# ShivajnanabodhaH

# શિવજ્ઞાનબોધઃ

## Document Information

Text title : Shiva Jnanabodhah

File name : shivajnAnabdhaH.itx

Category : shiva

Location : doc_shiva

Author : shivAgra yogI

Transliterated by : Vani V

Proofread by : Vani V

Latest update : January 31, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 31, 2022

*sanskritdocuments.org*

# શિવજ્ઞાનબોધઃ

સ્ત્રીપુંનપુંસકાદિત્વાજ્જગતઃ કાર્યદર્શનાત્ ।
અસ્તિ કર્તા સ હૃત્વૈતત્સૃજત્યસ્માત્પ્રભુર્હરઃ ॥ ૧॥

(જગતઃ કર્તાસ્તિ કાર્યદર્શનાત્ સ્ત્રીપુંનપુંસજાદિત્વાત્ સ
એતત્ હૃત્વા પુનઃ સૃજતિ અસ્માત્ હરઃ પ્રભુઃ ।)
અન્યઃ સન્વ્યાપ્તિતોઽનન્યઃ કર્તા કર્માનુસારતઃ ।
કરોતિ સંસૃતિં પુંસામાજ્ઞયા સમવેતયા ॥ ૨॥

નેતિતો મમતોદ્રેકાદક્ષોપરતિબોધતઃ ।
સ્વાપે નિર્ભોગતો બોધે બોદ્ધૃત્વાદસ્ત્યણુસ્તનૌ ॥ ૩॥

આત્માન્તઃકરણાદન્યોઽપ્યન્વિતો મન્ત્રિભૂપવત્ ।
અવસ્થાપઞ્ચકસ્થોઽતો મલરુદ્ધસ્વદૃક્ક્રિયઃ ॥ ૪॥

વિદન્ત્યક્ષાણિ પુંસાઽર્થાન્ન સ્વયં સોઽપિ શમ્ભુના ।
તદ્વિકારી શિવશ્ચેન્ન કાન્તોઽયોવત્સ તં નયેત્ ॥ ૫॥

અદૃશ્યં ચેદસદ્ભાવો દૃશ્યં ચેજ્જડિમા ભવેત્ ।
શમ્ભોસ્તદ્વ્યતિરેકેણ જ્ઞેયં રૂપં વિદુર્બુધાઃ ॥ ૬॥

નાચિચ્ચિત્સન્નિધૌ કિં તુ ન વિત્તસ્તે ઉભે સિથઃ ।
પ્રપઞ્ચશિવયોર્વેત્તા યઃ સ આત્મા તયોઃ પૃથક્ ॥ ૭॥

સ્થિત્વા સહેન્દ્રિયવ્યાધૈસ્ત્વાં ન વેત્સીતિ બોધિતઃ ।
મુક્ત્વૈતાન્ગુરુણાઽનન્યો ધન્યઃ પ્રાપ્નોતિ તત્પદમ્ ॥ ૮॥

ચિદ્દૃશાત્મનિ દૃષ્ટ્વેશં ત્યક્ત્વા વૃત્તિમરીચિકામ્ ।
લબ્ધ્વા શિવપદચ્છાયાં ધ્યાયેત્પઞ્ચાક્ષરીં સુધીઃ ॥ ૯॥

શિવેનૈક્યં ગતઃ સિદ્ધસ્તદધીનસ્વવૃત્તિકઃ ।
મલમાયાદ્યસંસ્પૃષ્ટો ભવતિ સ્વાનુભૂતિમાન્ ॥ ૧૦॥

દૃશોર્દર્શયિતા ચાત્મા તસ્ય દર્શયિતા શિવઃ ।
તસ્માત્તસ્મિન્પરાં ભક્તિં કુર્યાદાત્મોપકારકે ॥ ૧૧॥

મુક્ત્યૈ પ્રાપ્ય સતસ્તેષાં ભજેદ્વેષં શિવાલયમ્ ।
એવં વિદ્યાચ્છિવજ્ઞાનબોધે શૈવાર્થનિર્ણયમ્ ॥ ૧૨॥

ઇતિ શ્રીમદ્ શિવાગ્ર યોગી વિરચિતઃ શિવજ્ઞાનબોધઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Vani V

---

*ShivajnanabodhaH*

pdf was typeset on January 31, 2022

Please send corrections to *sanskrit@cheerful.com*